MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

A Critical Study of *Vipralambha Śṛṅgāra* in Kālidāsa's *Meghadūtam*

कालिदासप्रणीते मेघदूतखण्डकाव्ये विप्रलम्भशृङ्गारस्य विमर्शः

Dibyendu Chattopadhyay

Ph.D. Research Scholar
Dept. of Sanskrit, Pali & Prakrit
Visva Bharati University, Santiniketan, West Bengal, India.
Email: namastedibyendu@gmail.com
Page No: 88-93

Abstract: *Kālidāsa's Meghadūtam stands as a quintessential masterpiece of Vipralambha Śṛṅgāra (love in separation) in Sanskrit Khaṇḍakāvya literature. Serving as the primary aesthetic sentiment (Aṅgī-rasa), this separation is masterfully sustained through the exclusive use of the Mandākrāntā meter, whose somber cadence is universally recognized as fitting for exile (pravāsa-vyasana). The text portrays steadfast, restrained love enriched by appropriate guṇas, alaṅkāras, rītis, and subtle spiritual motifs honoring deities like Śiva and Skanda.*

Framed within the classical poetics of Mammata's Kāvyaprakāśa and Viśvanātha's Sāhityadarpaṇa, this paper offers an illustrative analysis of the definitions, classifications, and practical application of Vipralambha Śṛṅgāra. It critically examines the psychological and poetic manifestations of the ten stages of love-longing (Kāmadaśās)—from longing (abhilāṣā) to anxious contemplation (cintā)—as mirrored in the exiled Yakṣa's condition. Ultimately, the study highlights how Kālidāsa harmonizes classical aesthetic theory with profound human sensitivity.

Keywords: *Kālidāsa, Meghadūtam, Vipralambha Śṛṅgāra, Pravāsa-vipralambha, Śāpaja-vipralambha, Kāmadaśā, Yakṣa*

उपोद्घातः

संस्कृतसाहित्ये विश्वसाहित्ये च महाकविकालिदासः सहृदयानां हृदयं कविश्रेष्ठरूपेण अधिरोहति। यद्यपि अनेकेषां ग्रन्थानां रचयितृत्वेन महाकविकालिदासस्य नाम विद्यते, तथापि सप्त एव कृतयः कालिदासेन रचिता इति समीक्षकाः प्रमाणयन्ति। ताः सप्त कृतयः यथा— कुमारसम्भवम् (सप्तदशसर्गात्मकं महाकाव्यम्), रघुवंशम् (नवदशसर्गात्मकं महाकाव्यम्), अभिज्ञानशाकुन्तलम् (सप्ताङ्कविशिष्टं नाटकम्), विक्रमोर्वशीयम् (पञ्चाङ्कविशिष्टं नाटकम्) मालविकाग्निमित्रम् (पञ्चाङ्कविशिष्टं नाटकम्) च।

एतासु सप्तरचनासु मेघदूतम् अन्यतमम्। मेघ एव दूतः यस्मिन् तत् इति विग्रहः अस्ति।मेघदूतमपि कालिदासप्रणीतम् अपूर्वम् खण्डकाव्यम् अस्ति। मेघदूते मेघप्रवाहद्वारेण राष्ट्रस्य समग्रा भौगोलिकी स्थितिः कालिदासेन प्रदर्शिता वर्तते।परन्तु कविः वस्तुविधानं रुचिपूर्णकाल्पनिकदृष्ट्या करोति। यक्षः कश्चिद् कुबेरस्य वर्षभोग्येण शापेन अलकापुरीस्थितया प्रियया विरहितः रामगिरेः आश्रमेषु निवसति।तत्र वर्षतौ आषाढस्य प्रथमदिवसे नवीनं मेघमाकाशे वीक्ष्य दूरस्थितायाः प्रियायाः निकटे कुशलसमाचारं प्रापयितुं तमनुरुणद्धि। तस्य मार्गे आगतानां स्थानानां रमणीयं वर्णनमपि तन्मुखेन दर्शयति कविः।

मेघदूतगीतिकाव्यं पूर्वमेघः, उत्तरमेघश्चेति द्विधा विभक्तमस्ति। पूर्वमेघे 67 पद्यानि, उत्तरमेघे च 55 पद्यानि सन्ति। सर्वाणि पद्यानि मन्दाक्रान्ताच्छन्दसा विरचितानि वर्तन्ते।अत्र नायकः यक्षः, नायिका तु तत्पत्नी यक्षिणी अस्ति। मेघस्तु सन्देशवाहकः। अत्र मुख्यो रसः विप्रलम्भशृङ्गारः। विप्रलम्भे आलम्बनत्वेन नायक-नायिके परस्परं भवतः। मेघदूते यक्षः यक्षपत्नी च परस्परम् आलम्बनविभावौ स्तः। उद्दीपनविभावाः ते बाह्यपदार्थाः भवन्ति ये विरहज्वालां प्रज्वलयन्ति। वर्षाकालः, मेघः, विद्युत, चातकाः, हंसाः, आम्रकूटपर्वतः, उज्जयिन्याः मन्दिराणि इत्यादयः सर्वे पूर्वमेघे उद्दीपनत्वेन रसपरिपोषं कुर्वन्ति। अनुभावाः ते विकाराः ये शरीरे दृश्यन्ते — यथा गात्राणां कृशता, अश्रुपातः, दीर्घनिःश्वासः च। व्यभिचारिभावाः चिन्ता, दैन्य, स्मृति, विषादादयः शृङ्गारं पराकाष्ठां प्रापयन्ति। मेघदूते रीतिः वैदर्भी, प्रसादगुणगुम्फिता च रचना।पूर्वमेघभागस्तु विषयवर्णनात्मकः। उत्तरमेघस्तु

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

विरहवर्णनात्मकः रमणीयतरः।

कुबेरशापेन प्रियाविरहितस्य रामगिरेः आश्रमेषु वसतः यक्षस्य अलकापुर्यां स्थितां आत्मप्रियां प्रति मेघद्वारा कुशलवार्ताप्रेषणमेव मेघदूतस्य मुख्यः वर्ण्यविषयः। अनेन विषयमाध्यमेन कालिदासः भारतीयप्रकृतिसुषमां, मेघस्य मार्गमपि दर्शयितुं प्रयतते इति अयमपि विषयः व्यङ्ग्येण स्वीकर्तुं शक्यते। संस्कृतकाव्यजगति अनुपमं विद्यते मेघदूतम्।

विप्रलम्भशृङ्गाररसस्य सामान्यपरिचयः

संस्कृतकाव्यशास्त्रे शृङ्गाररसः 'रसराजः' इति कथ्यते। शृङ्गाररसः द्विविधः— संभोगः विप्रलम्भः च। यत्र नायकनायिकयोः मध्ये परस्परं दृढानुरागं विद्यते, परन्तु देशकालादिकारणात् तयोः समागमो न जायते, तत्र रसशास्त्रसम्मतः विप्रलम्भशृङ्गारः भवति। आचार्येण आनन्दवर्धनेन ध्वन्यालोकग्रन्थे स्पष्टं प्रतिपादितं यत् संभोगशृङ्गारपेक्षया विप्रलम्भशृङ्गारे रसस्य माधुर्यं अधिकं भवति—

"शृङ्गारे विप्रलम्भाख्ये करुणे च प्रकर्षवत्।
माधुर्य्यमार्द्रतां याति यतस्तत्राधिकं मनः॥" (धन्यालोकः, द्वितीयोद्यतः,8)

महाकविः कालिदासः अस्य विप्रलम्भरसस्य अद्वितीयप्रयोगः विश्वसाहित्ये प्रतिष्ठितः अस्ति। तस्य लेखनीप्रसूतं 'मेघदूतम्' विप्रलम्भशृङ्गारस्य एकः शाश्वतः आकरग्रन्थः अस्ति।

पण्डिताः साहित्यशास्त्रे रसेन सह छन्दसः सम्बन्धम् अनिवार्यं मन्यन्ते। यदि रसः काव्यस्य आत्मा अस्ति, तर्हि छन्दः तस्य वसनं वा शरीरं भवति। महाकविकालिदासेन मेघदूतखण्डकाव्ये प्रवासविप्रलम्भस्य प्रकाशार्थं मन्दाक्रान्ताछन्दसः अभूतपूर्वः प्रयोगः कृतः। अस्य मन्दाक्रान्ताछन्दसः मन्दा गतिः, गम्भीरश्च नादः विरहिणः यक्षस्य हृदयस्य दीर्घनिःश्वासान् अश्रुधारां च साक्षात प्रकाशं करोति। पण्डितमल्लीनाथसूरिणा स्वकीयोपोद्घाते मन्दाक्रान्तायाः औचित्यं प्रशंसितम् अस्ति।

संस्कृतसाहित्यशास्त्रीयपरम्परायाम् औचित्यस्य महत्त्वं सर्वोपरि वर्तते। रसौचित्यं विहाय काव्यं निर्जीवं प्रतिभाति। तत्र भरतमुनिना नाट्यशास्त्रे, आनन्दवर्धनेन ध्वन्यालोके, क्षेमेन्द्रेण च औचित्यविचारचर्चाग्रन्थे रसानुकूलवर्णयोजनायाः, छन्दोयोजनायाश्च अनिवार्यता स्वीकृता। यदा विप्रलम्भशृङ्गारस्य गम्भीरता आस्वाद्यते, तदा मन्दाक्रान्ताछन्दसः धीरा, मन्दारमणीया च गतिः तस्याः सर्वथा योग्या सहचरी भवति। अत्रैव कालिदासस्य महाकवित्वं प्रकाशते यत् सः सम्पूर्णे काव्ये कुत्रापि अन्यस्य छन्दसः प्रयोगं न करोति। मन्दाक्रान्ता न केवलं वृत्तसङ्ख्यापूरणाय अस्ति, अपितु सा यक्षस्य अन्तर्वेदनायाः मूर्तस्वरूपम् अस्ति।

विप्रलम्भशृङ्गार-करुणरसयोः सूक्ष्मभेदः

साहित्यशास्त्रे विप्रलम्भशृङ्गारसस्य करुणरसस्य च बाह्यलक्षणसाम्येऽपि आन्तरिकस्वरूपे महद् वैलक्षण्यं वर्तते। विप्रलम्भशृङ्गारस्य करुणरसस्य च मध्यगतः भेदः अतीव सूक्ष्मः महत्त्वपूर्णश्च अस्ति। एतयोः द्वयोः रसयोः बाह्यलक्षणानि, यथा—अश्रुपातः, क्रन्दनम्, कृशता, दैन्यम्, चिन्ता इत्यादीनि समानानि एव दृश्येते, परन्तु तयोः स्वरूपं, स्थायिभावः, मिलनस्य आशा च सर्वथा भिन्ना वर्तते।

काव्यशास्त्रीयग्रन्थानुसारं शृङ्गाररसस्य स्थायिभावः 'रतिः' अस्ति, परन्तु करुणरसस्य स्थायिभावः 'शोकः' वर्तते। विप्रलम्भशृङ्गारे नायक-नायिकयोः शरीरेण दूरत्वे सत्यपि मनसि पुनर्मिलनस्य दृढा प्रत्याशा अवश्यं जीवति। यदा हि करुणरसे सा आशा सर्वथा नश्यति, तत्र विरहः आत्यन्तिकः भवति। यत्र प्रियजनस्य आत्यन्तिकः विनाशः मृत्युर्वा भवति मिलनस्याशा च सर्वथा लुप्यते तत्र करुणरसः सिध्यति, न तु विप्रलम्भशृगाररसःसिद्धति। परन्तु यत्र केवलं देशकालकृतः विरहः भवति, मिलनस्य दृढा आशा वर्तते तत्र क्रन्दनादौ सत्यपि रतिभावस्य प्राधान्यात् विप्रलम्भशृङ्गारः एव भवति।

विप्रलम्भशृङ्गार-करुणरसयोः सूक्ष्मभेदं प्रदर्शयितुं महाकविना कालिदासेन विरचितानि काव्यानि एव सर्वश्रेष्ठानि उदाहरणानि सन्ति; यत्र मेघदूतस्य उत्तरमेघे यक्षः विरहवेदनया पीडितां स्वप्रियां स्मरन् क्रन्दति, परन्तु तत्र वर्षान्ते मिलनस्य दृढा प्रत्याशा वर्तते, तस्मात् कारणात् रति-स्थायिभावयुक्तः विप्रलम्भशृङ्गाररसः एव परिपुष्यति। अपरपक्षे च कुमारसम्भवमहाकाव्ये चतुर्थसर्गे

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

यदा कामदेवः मदनः शिवस्य कोपाग्निना भस्मीभूतः भवति, तदा तस्य भार्या रतिः प्रियतमस्य विनाशं मरणं च दृष्ट्वा सर्वथा निराशभूता सती "क्व नु ते हृदयङ्गमो जनः..." इत्यादिना विलापं करोति, पुनर्मिलनस्य कापि आशा तस्मिन् समये नासीत्, अतः 'शोकः' स्थायिभावात् करुणरसः सिध्यति।

काव्यशास्त्रदृष्ट्या विप्रलम्भशृङ्गाररसस्य स्वरूपं ,मेघदूते तस्य शास्त्रीयविनियोगश्च

विप्रलम्भशृङ्गारस्य स्वरूपविषये संस्कृतकाव्यशास्त्रस्य आधारभूतग्रन्थे अतीव गम्भीरतया वर्णना प्राप्यते। आचार्यमम्मटः काव्यप्रकाशग्रन्थे शृङ्गाररसस्य भेदद्वयं स्वीकरोति।यथा- सम्भोगशृङ्गारः विप्रलम्भशृङ्गारः च। यत्र नायक-नायिकयोः परस्परं रतिः अतीव तीव्रा भवति, परन्तु परिस्थितिवशात् सा अभीष्टं सुखं न प्राप्नोति, सः विप्रलम्भशृङ्गारः कथ्यते। पुनः मम्मटाचार्यः विप्रलम्भशृङ्गारस्य पञ्चभेदः स्वीकरोति। यथा- अभिलाषः, विरहः, ईर्ष्या, प्रवासः शापः च। मम्मटाचार्येण काव्यप्रकाशे चतुर्थोल्लासे उक्तं—

'अपरन्तु अभिलाषविरहेर्ष्याप्रवासशापहेतुक इति पञ्चविधः' (काव्यप्रकाशः, चतुर्थोल्लासः, 13)

मम्मटाचार्यः काव्यप्रकाशग्रन्थे शापजन्यविप्रलम्भशृङ्गारस्य उदाहरणं मेघदूतग्रन्थात् उद्धृतवान्। तेन उक्तं—

"त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायां
आत्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम्।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥" (उत्तरमेघः, 44) (काव्यप्रकाशः,चतुर्थोल्लासः,37)

अयं श्लोकः विप्रलम्भशृङ्गारस्य चरमोत्कर्षं प्रदर्शयति, अत्र कवेः कालिदासस्य लेखनी विरहिणः यक्षस्य दुःखं प्रकाशं करोति। अत्र शापवशात् प्रियायाः सुदूरं स्थितः यक्षः केवलं कल्पनावृत्या एव तया सह मिलितुं प्रयतते; अतः यक्षः गैरिकरङ्गैः शिलायाम् प्रेमकुपितां प्रियां चित्रयित्वा, तस्याः कोपं दूरीकर्तुं स्वयम् तस्याः पादयोः पतितुम् इच्छति। किन्तु तस्मिन्नेव क्षणे तस्याः स्मरणातिरेकेण तस्य नेत्रयोः प्रवृद्धाः अश्रुधाराः तस्य दृष्टिं निरुन्धन्ति, येन चित्रकर्म अपूर्णमेव तिष्ठति। अत्र यक्षः स्वस्य अश्रून् अपि क्रूरदैवस्य षड्यन्त्रं मन्यते, यः चित्रे अपि तयोः काल्पनिकं सङ्गमं सोढुं न शक्नोति; इत्थं चित्रगतेन काल्पनिकमिलनेन अपि वञ्चितः यक्षः विरहस्य परमं कष्टं प्राप्नोति, यत्र चित्रकला अपि तस्य विरहदुःखं दूरीकर्तुं न शक्नोति। अत्र यक्षस्य मानसिकी स्थितिः सामान्यः नास्ति। सः पूर्णतः विरहज्वालया व्याकुलः जातः अस्ति। चित्रगतेन मिथ्या-मिलनेन अपि वञ्चितः भूत्वा सः परमं दैन्यं प्राप्नोति। अस्मिन् श्लोके 'क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः' इति कथनेन कुबेरस्य शापमूलकः 'शापजन्य-विप्रलम्भ-शृङ्गारः' प्रत्यक्षं परिदृश्यते।मेघदूते यक्ष-यक्षपत्न्याः रतिः अतीव प्रकृष्टा अस्ति, परन्तु कुबेरशापवशात् सा अभीष्टं समागमं न प्राप्नोति, अतः मम्मटाचार्यमतेन अत्र शापजन्यविप्रलम्भस्य पूर्णः परिपोषः सिध्यति।

मेघदूतस्य उत्तरमेघे विप्रलम्भशृङ्गारस्य कारुण्यपूर्णं सजीवं च चित्रं दृश्यते, यत्र यक्षः मेघं प्रति स्वप्रियाविरहावस्थायाः करुणं चित्रं प्रस्तौति।श्लोकं यथा—

"आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।
पृच्छन्ती वा मधुरवचनां शारिकां पञ्जरस्थां
कच्चिद्भर्तुः स्मरसि निभृते त्वं हि तस्य प्रियेति ॥" (उत्तरमेघः, 24)

अयं श्लोकः विप्रलम्भशृङ्गारस्य अतीव सरलं भावपूर्णं च उदाहरणम् अस्ति।अत्र विरहिणी यक्षिणी पत्युः विरहे व्याकुला भूत्वा स्वमनः बहिरङ्गे रमयितुं प्रयतते। सा पूजां करोति, पत्युः चित्रं रचयति, तस्य नामयुक्तं गीतं च गातुम् इच्छति।परन्तु तस्याः दुःखं एतादृशं तीव्रम् अस्ति यत् सा किमपि कर्तुं न शक्नोति। अत्र विरहाग्निना कृशीभूता यक्षिणी विषयालम्बनं वर्तते, तस्याः विरहावस्था यक्षस्य रति-स्थायीभावं गभीरं करोति। श्लोकेऽस्मिन् काव्यशास्त्रीयनियमानुकूलं विभाव-अनुभाव-सञ्चारीभावानां शुद्धः संयोगः प्राप्यते। अत्र यक्षिण्याः शारीरिकी कृशता अनुभावरूपेण परिणमते, तथा च दैन्य-विषाद-

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

स्मृत्यादयः मानिसकभावाः सञ्चारीभावरूपेण मिलित्वा रतिभावं चरमोत्कर्षं नयन्ति। अस्मिन् श्लोके विप्रलम्भशृङ्गारस्य पूर्णता दृश्यते। महाकविकालिदासः रसशास्त्रस्य नियमान् पूर्णतः अनुसृत्य एव यक्षस्य कल्पनया सह यक्षिण्याः मानसिकं पवित्रं च विरहस्वरूपं प्रस्तौति, यत् पाठकेभ्यः लौकिकदुःखं विस्मृत्य अलौकिक-परमानन्दमयम् आस्वादं प्रयच्छति।

यत्र नायकनायिका द्वयोः परस्परं तिव्रः अनुरागः भवति, परन्तु शापदेशान्तरईर्ष्यादिभिः केनापि कारणेन तयोः प्रत्यक्षं मिलनं न सम्भवति, सः करुणरसयुक्तः विरहभावः विप्रलम्भशृङ्गारः कथ्यते। विप्रलम्भः मिलनस्य औत्सुक्यं प्रवर्धयति, प्रेमभावनां च परमां पवित्रां निष्कामाञ्च काष्ठां प्रापयति।

साहित्यदर्पणे विप्रलम्भशृङ्गारस्य मुख्यरूपेण पूर्वरागः, मानः, प्रवासः करुणश्च चत्वारः भेदाः वर्णिताः सन्ति। साहित्यदर्पणे उक्तं—

'स च पूर्वरागमान-प्रवासकरुणात्मकश्चतुर्धा स्यात्।' साहित्यदर्पणम् (3/185)

मेघदूते 'प्रवासविप्रलम्भः' अस्ति। प्रवासस्य लक्षणे आचार्येण विश्वनाथेन उक्तम्—

"प्रवासो भिन्नदेशित्वं कार्य्याच्छापाच्च सम्भ्रमात्।
अत्राङ्गचेलामालिन्यमेकवेणीधरं शिरः।
निःश्वासोच्छ्वासरुदितभूमिपातादि जायते॥" साहित्यदर्पणम् (3/193)

मेघदूते साक्षात् 'शापाद् देशान्तरगतो' इति लक्षणं चरितार्थं करोति। यक्षः रामगिरिं गतः, यक्षपत्नी च अलकापुर्यां वर्तते। तयोः अयं विरहः प्रवासविप्रलम्भस्य मूलाधारः अस्ति।

साहित्यदर्पणे विप्रलम्भशृङ्गारस्य विरहावस्थाचित्रणे अभिलाष-चिन्ता-स्मृति-गुणकथनोद्वेग-सम्प्रलापोन्माद-व्याधि-जडता-मरणरूपाः दश कामदशाः परिगणिताः सन्ति।उक्तं च—

"अभिलाषश्चिन्तास्मृतिगुणकथनोद्वेगसंप्रलापाश्च।
उन्मादोऽथ व्याधिर्जडतामृतिरिति दशात्र कामदशाः॥
अभिलाषः स्पृहा चिन्ता प्राप्युपायादिचिन्तनम्।
उन्मादश्चापरिच्छेदश्चेतनाचेतनेष्वपि॥
अलक्ष्यवाक्प्रलापः स्याच्चेतसो भ्रमणाद् भृशम्।
व्यधिस्तु दीर्घनिःश्वासपाण्डुताकृशतादयः॥
जडता हीनचेष्टत्वमज्ञानां मनसत्तथा॥" साहित्यदर्पणम् (3/186)

आचार्य-विश्वनाथस्य साहित्यदर्पणोक्ताः दश कामदशाः महाकवेः कालिदासस्य मेघदूते अतीव सुन्दरतया व्यक्ताः अभवन्। तासाम् उदाहरणसहितं संक्षिप्तं आलोचनां अधः प्रदत्तम् अस्ति।

१.**अभिलाषः**— प्रियां प्रति मनसि तीव्रः अनुरागः इच्छाभावः च उत्पद्यते। यथा— मेघदूते यक्षः रामगिर्याश्रमस्य आश्रमेषु स्थित्वा प्रियां मिलितुं उत्सुको भवति।

२.**चिन्ता** — प्रियायाः स्वास्थ्यं सुरक्षां च चिन्तयित्वा मनसि जायमाना व्याकुलता एव चिन्ता। यथा— मेघदूते 'कच्चिद्भर्तुः स्मरसि रसिके' इत्यादिषु श्लोकेषु यक्षः प्रियायाः जीवनविषये सततं चिन्तयति।

३.**स्मृतिः** — भूतकालस्य सुखदुःखानां पुनः पुनः स्मरणं स्मृतिः। यथा— मेघदूते "मद्गोत्रङ्कं विरचितपदं गेयमुद्गातुकामा" इति श्लोके प्रिया पत्युः नाम स्मरणं कृत्वा रोदिति।

४.**गुणकथनम्** — प्रियायाः सौन्दर्यस्य गुणानां च प्रशंसा। यथा— मेघदूते 'तन्वी श्यामा शिखरिदशना' इत्यादिना श्लोकेन यक्षः पत्न्याः अद्वितीयगुणानां शरीरसौष्ठवस्य च कीर्तनं करोति।

५.**उद्वेगः** — कस्मिन्नपि कार्ये मनसः उत्कण्ठा जायते, यत्र किमपि न रोचते। यथा— मेघदूते यक्षः प्रकृत्या व्याकुलो भूत्वा "धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः" इत्यादिना श्लोकेन अचेतनं मेघं प्रति याचनां करोति।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

६.**प्रलापः** — दुःखवशात् असम्बद्धं वा निरन्तरं रोदनपूर्वकं भाषणम्। यथा— मेघदूते यक्षस्य सम्पूर्णः सन्देशः एव एकः गम्भीरः प्रलापः अस्ति, यत्र सः जडं मेघम् अपि मित्रं मत्वा भाषते।

७.**उन्मादः** — चेतन-अचेतनयोः भेदं विस्मृत्य व्यवहारः उन्मादः इति कथ्यते। यथा— मेघदूते "त्वामालिख्य प्रणयकुपितां..." इति श्लोके यक्षः चित्रे एव वास्तविकं मिलनं मत्वा आत्मानं चरणपतितं कर्तुम् इच्छति, यः तस्य उन्मादं दर्शयति।

८.**व्याधिः**— विरहतापेन शरीरस्य कृशता ज्वरश्च 'व्याधिः' इति कथ्यते। यथा— मेघदूते 'मत्सादृश्यं विरचितवपुः' इत्यत्र विरहेण कृशायाः पत्न्याः शारीरिकव्याधिः दौर्बल्यं च वर्णितम् अस्ति।

९.**जडता** — इन्द्रियाणां क्रियाशून्यता, मतिभ्रमः च। यथा— मेघदूते अश्रुपातेन यदा यक्षस्य दृष्टिः लुप्यते "दृष्टिरालुप्यते मे", तदा सः हस्तसञ्चालने चित्रकर्मणि च जडः भवति।

१०.**मरणम्** — विरहस्य चरमा सीमा मरणं भवति, किन्तु काव्ये केवलं मूर्च्छासादृश्यावस्था एव वर्ण्यते। यथा— मेघदूते कालिदासः मरणं न वर्णयति, परन्तु पत्न्याः कृते 'कण्ठश्लेषप्रणयिनि जने दूरसंस्थे..' इति श्लोकेन जीवितावस्थायाः सङ्कटं सूचयति।

मल्लिनाथेन उत्तरमेघस्य श्लोकेषु एतासां दशानां स्पष्टा रसपरक-व्याख्या कृता अस्ति। काव्यप्रकाशानुसारं विप्रलम्भे माधुर्यगुणेन चित्तस्य द्रुतिः अतिशयेन भवति—

"आह्लादकत्वं माधुर्यं शृङ्गारे द्युतिकारणम्।
करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्॥" काव्यप्रकाशः (8/68)

मेघदूते मन्दाक्रान्ताछन्दसा सह वैदर्भीरीतेः प्रयोगः रसपरिपोषं करोति। विप्रलम्भस्य उन्मादावस्थायां यक्षः जडं मेघं चेतनं मत्वा दूतं करोति—

"कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥" (पूर्वमेघः,5)

विप्रलम्भस्य अन्ते मिलनस्य आशा सर्वदा जीवति। शापान्ते पुनः मिलनस्य उद्घोषेण अयं रसः करुणरसत्वं न प्राप्नोति—

"भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे।" (उत्तरमेघः,110)

विप्रलम्भशृङ्गारस्य रसपरिपोषाय काव्याशास्त्राचार्याणां सिद्धान्तः युक्तियुक्तं अस्ति। काव्याशास्त्राचार्यैः रसस्य या आन्तरिकी अनुभूतिः साधारणीकरणमाध्यमेन वर्णिता, सा मेघदूते पूर्णरूपेण पश्यति। यक्षस्य विरहः केवलं एकस्य जीवस्य दुःखं न ,सर्वविरहिणां हृदयस्य प्रतिध्वनिः जायते। तत्रैव साहित्यदर्पणकारस्य विश्वनाथस्य मतेन प्रवासविप्रलम्भस्य विभावयोजना सर्वथा दोषरहिता वर्तते। यदा यक्षः मेघं दूतरूपेण पश्यति, तदा तस्य कामदशायाः तीव्रावस्था आरभ्यते। तस्य मनसि निरन्तरं चिन्ता वर्तते। सः चिन्तयति कथं तस्य प्रिया एकाकिनी अलकापुर्यां कालं यापयति। सा रात्रौ जागर्ति, , तस्याः शरीरं क्षीणं भवति।

उपसंहारः

महाकविकालिदासविरचितं 'मेघदूतम्' संस्कृत-वाङ्मये विप्रलम्भशृङ्गारस्य सर्वोत्कृष्टं निदर्शनं वर्तते। अस्मिन् काव्ये यक्षस्य या मानसिकी दशा, विरहवेदना, प्रेम्णश्च अनन्यता चित्रिता, सा रसिकानां चेतांसि आह्लादयति। मम्मटाचार्यस्य काव्यप्रकाशः तथा विश्वनाथकविराजस्य साहित्यदर्पणः इति ग्रन्थद्वयस्य आधारेण यदि मेघदूतस्य विप्रलम्भशृङ्गारस्य समीक्षा क्रियते, तर्हि इदं स्पष्टं भवति यत् काव्यमिदं शास्त्रीय-लक्षणानां पूर्णतः अनुकरणं करोति।

आचार्यमम्मटेन काव्यप्रकाशे विप्रलम्भशृङ्गारस्य आभिलाषादि पञ्च भेदाः स्वीकृताः। अस्मिन् प्रसङ्गे मेघदूते मुख्यरूपेण 'शापजन्य-विप्रलम्भः' परिलक्षति, यतो हि यक्षः कुबेरस्य शापेन अलकापुर्याः दूरं रामगिरि-आश्रमेषु प्रवासं करोति। अपरपक्षे, आचार्यविश्वनाथेन साहित्यदर्पणे विप्रलम्भस्य चत्वारः भेदाः स्वीकृताः। मेघदूतस्य विप्रलम्भः 'प्रवास-विप्रलम्भस्य' सर्वोत्कृष्टम् उदाहरणं सिद्धति, यतः यक्षयक्षिण्योः वियोगस्य मूलकारणं कुबेरस्य शापः एव अस्ति। टीकाकारः मल्लिनाथः अपि अस्य समर्थनं

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

कुर्वन् कथयति यत् शापस्य अवधिनिर्धारणं वियोगस्य तीव्रतां वर्धयति।

काव्यप्रकाशसाहित्यदर्पणादि-ग्रन्थानां सिद्धान्तानुसारं मेघदूतम् केवलं विरहकाव्यं नास्ति, अपितु तत् विप्रलम्भशृङ्गारस्य रसनिष्पत्तेः एका रससिक्ता पराकाष्ठा वर्तते। मेघदूते वर्णितः वियोगः मम्मटाचार्यमते 'शापज-विप्रलम्भः' तथा आचार्य विश्वनाथाचार्यमते 'प्रवासज-विप्रलम्भः' इति उभयोः लक्षणानां पूर्णतया पूरकः अस्ति। मल्लिनाथमते अयं रसः विप्रलम्भस्य प्रकर्षं सूचयति। काव्ये विरहिण्याः यक्षिण्याः अवस्थामधिकृत्य चिन्ता-जागरा-तानवादि-कामदशानां चित्रणं शास्त्रीयपद्धत्या कृतमस्ति।

Bibliography

- कालिदासः।(1389)। मेघदूत-परिचयः। भट्टाचार्यः,पार्वतीचरणः(सम्पा.)।कोलकाता: संस्कृत-पुस्तक-भाण्डारः।
- कालिदासः।(2012)। मेघदूतम् (सञ्जीवनी-टीका-सहितम्)। शास्त्री,दयाशङ्करः(सम्पा.)।वाराणसी: चौखम्बा सुरभारती प्रकाशन।
- कालिदासः।(1909)। मेघसन्देशः(विद्युल्लता-टीका-सहितम्)।सूरिः,श्रीकृष्णः(सम्पा.)।श्रीरङ्गम्: श्रीवाणीविलास-प्रेसः।
- मम्मटः।(1983)।काव्यप्रकाशः। आचार्य,भट्टवामनः(सम्पा.)। पुणे: भण्डारकर ओरियन्टल रिसर्च इन्स्टीट्यूट।
- मम्मटः।(2026)।काव्यप्रकाशः। मुखोपाध्यायः,कल्पिका (सम्पा.)।कोलकाताःजयश्री प्रेसः।
- विश्वनाथकविराजः।(2013)। साहित्यदर्पणम्। मुखोपाध्यायः,विमलाकान्तः(सम्पा.)। कोलकाता: संस्कृत-पुस्तक-भाण्डारः।
- आननन्दवर्धनः।(2021)। धन्यालोकः।मुखोपाध्यायः,अञ्जलिका (सम्पा.)।कोलकाता: संस्कृत-बुक-डिपो।
- कालिदासः।(1996)।कालिदासग्रन्थावली ।त्रिपाठी,ब्रह्मानन्दः(सम्पा.)।दिल्लि: चौखम्बा संस्कृत प्रतिष्ठान।